# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – आचार्य: (SEM-4)** **प्रश्नपत्रम् – 5** गुणाः –70

विषयः – धर्मशास्त्रम् **कोड –C.E.5.4.4** समयः - ११ तः ०२ पर्यन्तम्

दिनाङ्कः –03/04/2019 सन्दर्भग्रन्थः – विदूरनीतिः (1-8 अध्यायाः)

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 एकस्य श्लोकस्य ससन्दर्भं व्याख्या कार्या। 05**

(1) यथा मधु समादत्ते रक्षन् पुष्पाणि षट्पदः।
तद्वदर्थान्मनुष्येभ्य आदधादविहिंसया॥

(2) परं क्षिपति दोषेण वर्तमानः स्वयं तथा।
यश्च क्रुध्यत्यनीशानः स च मूढमतो नरः॥

**प्रश्नः-2 एकस्य सविस्तरमुत्तरं लिखत। 10**

(1) विदूरेण धृतराष्ट्राय प्रदत्तः राजधर्मोपदेशं विविच्यताम्।

(2) विदूरनीतेः वैशिष्ट्यं वर्णयत।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 एकस्य ससन्दर्भं व्याख्या कार्या। 05**

(1) एकः पापानि कुरुते फलं भुङ्क्ते महाजनः।
भोक्तारो विप्रमुच्यन्ते कर्ता दोषेण लिप्यते॥

(2) न मनुष्ये गुणः कश्चिद् राजन् सघनतामृते।
अनातुरत्वाद् भद्रं ते मृतकल्पा हि रोगिणः॥

**प्रश्नः-4 एकस्य निबन्धात्मकमुत्तरं लिखत। 10**

(1) मानवजीवने विदूरनीतेः महत्वं प्रतिपादयतु।

(2) चतुर्थाध्यायस्य सारांशो लेख्यः।

### तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 एकस्य ससन्दर्भं व्याख्या कार्या। 05**

(1) सुलभाः पुरुषाः राजन् सततं प्रियवादिनः।
अप्रियस्य तु पत्थ्यस्य वक्ता श्रोता च दुर्लभः॥

(2) पूजनीया महाभागाः पुण्याश्च गृहदीप्तयः।
स्त्रियः श्रियः गृहस्योक्तास्तस्माद् रक्ष्या विशेषतः॥

**प्रश्नः-6 एकस्य सविस्तरं भावार्थो लेख्यः।** **10**

(1) राजा सर्वहरः न भवेदिति सूक्तिं यथाग्रन्थं विलिखत।

(2) महात्मनः विदूरस्य पात्रालेखनं कुरुत।

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-7 एकस्य सन्दर्भपुरस्सरं भावार्थो लेख्यः।** **05**

(1) कान्तारे वनदुर्गेषु कृच्छ्रास्वापत्सु सम्भ्रमे।
उद्यतेषु च शस्त्रेषु नास्ति सत्ववता भयम्॥

(2) अक्रोधेन जयेत् क्रोधमसाधुं साधुना जयेत्।
जयेत् कदर्यं दानेन जयेत् सत्येन चानृतम्॥

**प्रश्नः-8 एकस्य सविस्तरमुत्तरं लिखत।** **10**

(1) महात्मानः कथनशैलीं यथाग्रन्थं प्रतिपादयत।

(2) यतो धर्मः ततो जयः सूक्तिम् इमां ग्रन्थानुरूपं विविच्यताम्।

**प्रश्नः-9 दशानां लघूत्तराणि लिखत।** **10**

(1) विदूरनीतौ कति अध्यायाः सन्ति ?

(2) विदूरनीतौ संवादः कयोर्मध्ये भवति ?

(3) आचार शब्दे कः धातुः विद्यते ?

(4) विदूरनीतिः कस्मिन् पर्वणि वर्तते ?

(5) विरोचनः कस्य पुत्रोऽस्ति ?

(6) विद्या केन रक्ष्यते ?

(7) इन्द्रियाणि कीदृशानि सन्ति ?

(8) कदा मनुष्यः स्वर्गलोके महीयते ?

(9) रथः कस्य शरीरम् अस्ति ?

(10) नरकस्य कतिविधं द्वारम् अस्ति?

(11) जरा किं हरति ?

(12) श्रुतं कुत्र नष्टं भवति?

(13) श्रियः कति समिधः?

(14) धर्मस्य कतिविधः मार्गः स्मृतः?

(15) गावः केन पश्यन्ति?